ISSN : 2250-1193

Year 5, No. 8
October-December, 2015

# अनुकृति

An International Refereed Research Journal

Scanned with CamScanner

Reg. No. 694/2009-10

ISSN : 2250-1193

# अनुकृति

An International Refereed Research Journal

वर्ष–5, अंक–8

अक्टूबर–दिसम्बर, 2015

प्रधान सम्पादक
प्रो. विजय बहादुर सिंह
हिन्दी विभाग
काशी हिन्दू विश्वविद्यालय
वाराणसी

सम्पादक
डॉ. रामसुधार सिंह
पूर्व अध्यक्ष, हिन्दी विभाग
उदय प्रताप स्वायत्तशासी महाविद्यालय
वाराणसी

प्रकाशक
सृजन समिति प्रकाशन
वाराणसी (उ.प्र.)

Scanned with CamScanner

'अनुकृति' (An International Refereed Research Journal), वर्ष–5, अंक–8, अक्टूबर–दिसम्बर, 2015 ISSN : 2250-1193

1-2
3-6
7-8
9-12
13-18
19-22
23-24
25-26
27-30
31-34
35-36
37-40
41-46
47-48
49-54
55-58
59-60
61-62

- समकालीन हिन्दी दलित कवयित्रियों के काव्य में नारी सम्बन्धी मानव मूल्य — 63-66
  राजीव रंजन पटेल
- विवाह में स्वयंवर प्रथा का महत्व — 67-68
  संदीप कुमार
- डॉ0 बलभद्रप्रसाद शास्त्री के अनुसार आहतकश्मीरम् गद्यकाव्य में समाजिक जीवन का वर्णन — 69-72
  वन्दना कुमारी
- मानव समाज के कल्याण हेतु गन्धर्वों का योगदान — 73-76
  योगराज
- मुद्गलपुराणे श्रीगणेशस्य अष्टावतारः विविधपुराणेषु विविध गणपतिनाम च — 77-78
  अरविन्द कुमार सिंह
- शिवराजविजये शिववीरस्य स्वप्रवृत्तिसमीक्षणम् — 79-82
  विक्रमदेवसिंहचंदेलः
- महामना पंडित मदन मोहन मालवीय तथा आपसी सौहार्द — 83-84
  डॉ0 हबीबुल्लाह
- क्रांतिकारी आन्दोलन और बनारस — 85-88
  डॉ0 संजय कुमार सिंह
- जीवन मूल्यों का संकट — 89-90
  डॉ0 अशोक कुमार
- धर्म निरपेक्ष संस्कृति : एक समाजशास्त्रीय अध्ययन — 91-94
  डॉ0 आलोक कुमार कश्यप
- नैषधीयचरितमहाकाव्यस्य ऐतिहासिक उपादानम् — 95-100
  चन्द्रशेखरपाण्डेयः
- मध्य एशियाई ऊर्जा स्रोतों विशेषतः तेल व गैस पर भू–राजनीति — 101-104
  अभिनव राय
- दलित स्त्रियों के प्रति समाजिक विडम्ना — 105-106
  अनुरुद्ध कुमार सिंह
- वैश्विक सुरक्षा एवं आतंकवाद — 107-110
  अर्चना सिंह
- देवीपाटन मण्डल में जनसंख्या वृद्धि का कालिक एवं क्षेत्रीय दशाएं — 111-114
  अरुण कुमार वर्मा एवं डॉ0 शिवाकान्त सिंह
- वेदेषु आधुनिके च विज्ञानाध्यात्मिकयोः विचारविमर्शः — 115-118
  बी. उमामहेश्वरी
- कुसुम कुमार कृत उपन्यास हीरामन हाईस्कूल का समीक्षात्मक अनुशीलन — 119-122
  डॉ0 अमरेश बहादुर
- श्रीमद्भागवते ज्ञानार्जनपरम्परा — 123-124
  डॉ0 अमृतलालः भोगायता



Scanned with CamScanner

# वेदेषु आधुनिके च विज्ञानाध्यात्मिकयोः विचारविमर्शः

बी. उमामहेश्वरी*

'विद ज्ञाने' इति धातुना निष्पन्नः वेदशब्दः। तस्य ज्ञानम् इत्यर्थः। वेदाश्चत्वारः ऋग्यजुस्सामाथर्वा इति। एकैकस्य चत्वारो विभागाः। संहिता, ब्राह्मणं, आरण्यकं, उपनिषदिति। एतेषां चतुर्णां चतुराश्रमेषु विभक्ताः। यथा– ब्रह्मचारिणां संहिता, गृहस्थानां ब्राह्मणं, वानप्रस्थानामारण्यकं, सन्यासीनां च उपनिषदिति। तत्र वेदो नाम क इति जिज्ञासायाम् उच्यते–

**"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः"** इति।

तत्रैव–

**"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
**एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।"**

अर्थात् प्रत्यक्षेन अनुमानेन च यद्विषकं ज्ञानं न भवति, तत् ज्ञानार्थं वेद एव आश्रयणीय। **'विद्यन्ते ज्ञायन्ते लम्यन्ते वा एभिः लौकिकपारलौकिकविषयसर्वस्वम्** इति वेदः' इति। तथा च वेदः विज्ञाननिधिरिति, सर्वजीवानां कल्याणकौशलविधानम्। जगति समस्तवस्तुविनियोगविधानमपि वेदे वर्तते। वेदे तावत् भूगोल–खगोल–अणु–वृक्ष–जन्तु–आरोग्य–विद्युत्–यन्त्र–मन्त्र–तन्त्रादि अनेकवैज्ञानिक– विषयाः प्रदर्शिता अस्मदृषिभिः। जाति–धर्म–लिङ्ग–आश्रम–वय–देश–कालविषयाः किं बहुना, 'वेद इति **विज्ञानसर्वस्वम्**' इति। अद्यतनकाले यद्यत् विज्ञानविश्वरूपं जातं तत्तद्वेदोत्पन्नमिति मन्तव्यमेव।

अर्वाचीनविज्ञानविद अनेकविज्ञानविषयान् मानवजीवनकार्येषु सुखसाधनीभूताः कृताः। एते सर्वे विज्ञान–विषयाः अस्मद्वेतोत्पन्नानीति अस्मदीयाः कथयन्ति। यथा–तत्र भूगोलविज्ञानमधिकृत्य विचारतिष्यामः। तत्र पृथिवी न समतला किन्तु गोलाकारा इति सहस्रवर्षपूर्वमेव अस्मद् महर्षिभिरुद्घोषितम्। न तु अद्यतनविज्ञानविदः।

वेदस्य कालगणना अगनना एव। तदर्थं वेदकालः कदा इति प्रश्ने सति न केनापि अस्मदृषिभिरीषदपि चिन्तनं कृतम्। कस्मात् ? तत्सनातनत्वात्, इति सर्वैरस्मदाचार्यैः अभिमतम्। तत्र प्रथमं भूगोलस्य गोलाकारविषये विचारयामः। ऋषिविज्ञानपथि कदाप्येवं न चिन्तितं भूगोलं समतलमिति। 'भूगोल' इति शब्देनैव ज्ञायते, भूमेः गोलाकृतिरिति। किन्तु पाश्चात्यविज्ञाने पूर्वं भूमिः समतला इति मन्यन्ते स्म, न तु अस्मदादिभिः कदाचनापि। प्रप्रथमं **'केप्लर् कोपर्निकस्, गेलीलियो'** इत्यादि पाश्चात्यवैज्ञानिकाः पृथिवी गोलाकारा इति उक्तवन्तः। एतेषां समयस्तु षोडशसप्तदशखीष्टाब्दाः एव। अपि तु वेदः तावत् सनातनः। तत्र भूमेः गोलाकारविषये ऋग्वेदे यथा– **"चक्राणासः परीणहं पृथिव्या"** इति। अर्थात् पृथिव्याः वृत्तस्यान्ते विद्यमाना इति। तथैव आर्यभट्टादयः श्रुतिमनुश्रुत्यैव विशदतया स्व स्व शास्त्रेषु निरूपितवन्तः। यथा सूर्यसिद्धान्ते **"मध्ये समन्तादण्णस्य भूगोलो व्योम्नि तिष्ठति"** अर्थात् ब्रह्माण्डमध्ये भूगोलः आकाशे तिष्ठति इति। तथैव आर्यभट्टीये **"भूगोलः सर्वतो वृत्तः"** इति। अर्थात् भूगोलः सर्वतः वृत्ताकार इति। आर्यभट्टस्तु पञ्चमशताब्दीयः। पञ्चसिद्धान्तिके वराहमिहिरः अस्मिन्नेवविषये वक्ति, **"पञ्चमहाभूतमयस्तारागणपञ्जरे महीगोलः"** इति। अर्थात् पञ्चभूतात्मिका इयं पृथिवी पञ्जरसदृशे तारागणसमूहे अयःपिण्ड इव विराजते। वराहमिहिरसमयस्तु षष्टशताब्दीयः। तत्र लीलावतीग्रन्थे भास्कराचार्येण अतिविस्तृततया विवृतम्। अर्थात् पाश्चात्यवैज्ञानिकेभ्यः पूर्वमेव अस्मद् ऋषिभिरुक्तमस्ति इति अनेन स्पष्टो भवति।

ततः सौरकुटुम्बे सूर्यः मध्ये वर्तत इति, सूर्येतरग्रहाः सूर्यस्य परितः भ्रमन्तीति कोपर्निकस् महोदयेन १४५३ वर्षे प्रोक्तम्। सिद्धान्तमेतत् 'बैविल्' ग्रन्थस्य व्यतिरेकमिति क्याथलिक् समाजः एतं बहिष्कृतवन्तः। तमेव सिद्धान्तं गेलीलियो महोदयः १६३२ वर्षे दृढीकृत्वा क्याथलिक् समाजदृष्ट्या पातकोऽभवत्। विषयेऽस्मिन् ऋग्वेदादयः प्रतिपादयन्ति यथा– **"मित्रो दाधारपृथिवीमुतद्याम्। मित्रः कृष्टीः"** इति। अर्थात् सूर्य एव सर्वान् ग्रहान् स्व आकर्षणशक्त्या चालयति इति।

---

* सहायकाचार्य–न्यायदर्शनम्, श्रीसोगनाथसंस्कृतयुनिवर्सिटी, वेरावलम, गुजरात्



Scanned with CamScanner

अपि च "त्रिनाभिचक्रमजरमनर्वं ये नेमा विश्वाभुवनानि तस्थुः" इति। सर्वेग्रहाः अण्डाकारकक्षायां निरन्तरं परिभ्रमन्तीति। किञ्च "आयङ्गौः पृष्णिरक्रमीत् असदन्मातरं पुरः। पितरं च प्रयन्त्स्वः" मन्त्रमिदं चतुर्षु वेदेषु वर्तते। यथा ऋग्वेदे १०,१८६,१। यजुर्वेदे– १,५,३,२। सामवेदे– ३६०, २३७६। अथर्ववेदे ६,३२,१ च इति। अस्यार्थः पृथिव्या उपग्रहरूपचन्द्रः स्व मातृग्रहभूमेः परितः परिभ्रमति। तथैव भूमिरपि स्व पितृग्रहस्य प्रकाशकसूर्यग्रहस्य समन्ततः भ्रमतीति। बुधग्रहस्य नामान्तरं भौम–कुज इति नाम्ना एव विज्ञायते यत् भूमे अपत्यं पुमान् भौम इति। कु इति पृथिवी तस्याः जात इति कुजः। विषयोऽयं अर्वाचीनवैज्ञानिकाः वदन्ति। (आधारग्रन्थ –Ancient Indian science and its relevance to modern world] published by Rashtriya sanskrit vidyapeetha tirupati).

अधुना सूर्यकिरणस्य सप्तविषयः– सूर्यकिरणे सप्तवर्णाः सन्तीति षोडशशताब्दीयः न्यूटन् महाशयेन उक्तम्। सप्तवर्णविषये अस्माकं वेदेऽपि वर्तते यथा– "सप्तत्वा हरितो रथेवहन्ति देवसूर्य। शोचिष्केशं विचक्षण" इति। अथर्वणवेदेपि यथा– "अव दिवस्तारयन्ति सप्तसूर्यस्य रश्मयः" इति। अर्थात् सूर्यस्य किरणे सप्तवर्णाः सन्तीति। "एको अश्वो वाहति सप्तनाम" इति। अत्र अश्व इत्युक्ते किरणज्ञापकः। "सप्ताश्वरथमारूढं प्रचण्डं कस्यपात्मजम्" इति वाल्मीकिरामायणे अगस्त्यमहर्षिणा प्रोक्तम्। ततःपरं कान्तिवेगविषये किञ्चित् ज्ञास्यामः। अतिकठिना कान्तिवेगगणना, तथापि सुलभतरा कृता पाश्चात्यवैज्ञानिकेन 'रोमर्' महाशयेन। सप्तदशशताब्दीयः। कान्तिवेगविषये अस्मद्वेदे पूर्वमेवोक्तमस्ति यथा– "तरणिर्विश्वदर्शितो ज्योतिष्कृदसि सूर्य विश्वमाभासिरोचनम्" इति मन्त्रस्य भाष्ये चतुर्दशशताब्दीयः सायणाचार्यः श्लोकरूपेणोक्तवान् यथा –

"योजनानां सहस्रं द्वे द्वेशते द्वे च योजने।
एकेन निमिषार्धेन क्रममाण नमो स्तुते"।। इति।

अनेन श्लोकेन ज्ञायते निमेशार्धेन २२०२ योजनदूरं प्रयाणं क्रियमानाय किरणाय नम इति। एकयोजनमित्युक्ते ६ मैल्स्, १६० गजाः इति। इयं गणना ६.११ मैल्स् समाना। भारतीयकालगणनाप्रकारेण एकस्मिन्नहोरात्रौ ८१०००० अर्धनिमेषाः भवन्ति। अर्थात् १ सेकण्ड = 8.75 अर्धनिमेषा इति, अतः प्रत्यर्धनिमेषम् २२०२'६.११ =२००६०.२२मैल्स्।

२००६०'८.७५=१८८०६४ मैल्स् प्रतिसेकण्डप्रति इति कान्तिवेगगणना सायणाचार्येण प्रतिपादितम्। अस्मिन्नेवविषये आधुनिकवैज्ञानिकाः विंशतिशताब्दीयाः 'मेकिल्सन्स्, मोर्ले' महोदयाः कान्तिवेगविषये एवं कथयन्ति, प्रतिसेकण्ड 186300 मैल्स् इति। इदमेव साम्प्रतं प्रमाणं तेषाम्। १३६५ वत्सरे सायणाचार्योक्तविषयमेव १८९० वत्सरे मैक्समुल्लर् महाशयेन आङ्लऋग्वेदसङ्कलनग्रन्थे प्रतिपादितम्। ग्रन्थस्यास्य मुख्यप्रति अद्यापि वडोदरा केन्द्रग्रन्थालये सुरक्षितमस्ति।

(आधारग्रन्थः – the speed of light and puranic cosmology – subhashkak)

ततः वृक्षविषये–

जगदीशचन्द्रवोस् इत्यादि वैज्ञानिकाः वृक्षेषु अपि प्राणाः वर्तन्ते इति तेषां गम्भीरान्वेषणानन्तरं उक्तवन्तः तत्र न केवलं वृक्षेषु प्राणा एव अपि तु सुखदुःखरूपरसगन्धस्पर्शशब्दादयोऽपि विद्यन्ते इति वेदव्यासस्य वचनं।

यथा–

"वल्लीवेष्टयते वृक्षं सर्वतश्चापि गच्छति।
नह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः।।
पुण्यापुण्यैः तथागन्धैः धूमैश्च विविधैरपि ।
अरोगाः पुष्पिताः सन्ति तस्मात् जिघ्रन्ति पादपाः।।
वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्यते।
श्रोत्रेण गृह्यते शब्दः तस्मात् श्रुण्वन्ति पादपाः।।
उष्मणा ग्लायते वर्णं त्वक्फलं पुष्पमेव च।
ग्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते"।।

Scanned with CamScanner

ISSN : 2250-1193

ततः–

"वृत्तभपञ्जरमध्ये कक्षया परिवेष्टितः खमध्यगतः।
मृज्जलशिखिवायुमयो भूगोलः सर्वतो वृत्तः"।।

इति ऋषिवाक्यं तत्र प्रमाणम्। एवञ्च खगोलविषये अङ्गारकग्रहः पृथिवीतः सञ्जात इति पूर्वैरुक्तम्। 'अङ्गारकमहीपुत्र भगवान् भक्तवत्सलः' इति आर्षवाक्यम्। अमुं विषयं अद्यतनविज्ञानविदः मन्यन्ते एव। एवं बृहस्पतिः, शनैश्चरः, कुज इति नामेष्वेव विज्ञानं प्रस्फुटीकृतम्। तत्र सूर्यविषये **"नैको सूर्यः बहवः सूर्याः"** सन्तीति अद्यतनवैज्ञानिकैरुक्तम्। किन्तु ततः बहुकालात्पूर्वमेव अरुणमन्त्रे उक्तमस्ति **"सप्तविधो नानासूर्याः"** इति। तथा सूर्यकिरणाः सप्त भवन्तीति अथर्वणवाक्यं यथा– **"सप्तसूर्यस्य रश्मयः"** इति। सूर्यरश्मयः ऋजुमार्गगाः इति पूर्वं मन्यन्ते स्म वैज्ञानिकाः। अधुना तु गवेषणानन्तरम् अत्रऋजुमार्गगाः इति ज्ञातवन्तः वैज्ञानिकाः। एतद्विषयं पूर्वमेव अस्मद् ऋषिभिः प्रतिपादितम्। यथा हि– **"भुजगणमितास्सप्ततुरगाः"** इति। **'सूर्यस्तमयौ न स्तः'** इति ऐतरेयब्राह्मणवचनम्, यथा– **'कदाचनास्तमेति नोदेति सूर्यः'** इति। आरोग्यविषये वारुणि रोगहरणशक्तिरस्तीति ऋग्वेदे यथा– **"अप्स्वनतरमृतमप्सुभेषजम्"** इति वर्णितम्। तमेव जलचिकित्सा इत्यपि वदन्ति। बहुरोगनिवार्णार्थं नदीषु जलपातेषु स्नानं कुर्वन्त्विति अर्वाचीनभिषजैरुच्यते। तदनुगुणमन्त्रोऽपि यजुर्वेदे दृश्यते यथा– **"अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः"** इति।

**"यन्मनसामनुते तद्वातमपि गच्छति"** इति ऋग्वेदीयमन्त्रमाधारीकृत्य मनोगतविषयाः वायुमण्डल–माप्नुवन्तीति विषयम् अद्यतनवैज्ञानिकाः अगतिकतया अङ्गीकुर्वन्ति। **'आपो वाता ओषधयः'** इत्यथर्वणमन्त्रे मानवारोग्यरक्षणाय आपः, वायुः, ओषधयः मुख्यरूपा इत्युक्तमस्ति। आयुर्वर्धनार्थं **"घृतं पीत्वा मधुचारु भक्षणम्"** इत्यथर्वणवाक्यं निरूपयति। प्रसवसमये यदि प्रसवः क्लिष्टो भवति तदा माताशिशुसंरक्षणार्थं शस्त्रचिकित्सा करणीया इति अथर्वणवेदे यथा दृ "विते भिनदिम मेहानम्" इति मन्त्रं सूचयति।

तथा वेदविज्ञानमधिकृत्य नागार्जुनेन रससिद्धान्तम्, कणादेन अणुसिद्धान्तमाविष्कृतम्। युद्धशास्त्रम् इत्यादिविषयाः, समराङ्गणसूत्रधारग्रन्थे भोजेन अभिवर्णिताः। सूर्यरश्मिप्रभावमाधारीकृत्य अंशुबोधिनिग्रन्थः भरद्वाजेन, ओषधिकल्पम् अत्रिमहर्षिणा, पदार्थविज्ञानसम्बन्धिविषयाः धातुसर्वस्वे बोधायनेन, मेघोत्पत्तीत्यादिविषयाः अङ्गीरसेन, लोहसङ्ग्रहं लोहतन्त्रे शकटायनेन, छायाचित्रसम्बन्धिरूपाकर्षणतन्त्रं भरद्वाजेन, वैद्यसम्बन्धिविषयाः चरकशुश्रुतसंहितयोः, नारदप्रणीतधूमप्रकरणम्, इत्येवं विधानेकग्रन्थेषु अस्माकम् ऋषिभिः वेदविज्ञानवैभवं प्रदर्शितम्।

अस्माकं देशे वेदकालादारभ्यैव शास्त्राणामध्ययनम् अध्ययते स्म। शास्त्राध्ययनसमये एव अनेकविज्ञान–शास्त्रग्रन्थानामाविर्भावो जातः। तेषु केषाञ्चनग्रन्थानां विषयेऽधुना चर्चयामः।

1. अक्षरलक्षः– शास्त्रमिदम् अनेकशास्त्राणां सङ्ग्रहात्मकम्, ग्रन्थस्यास्य कर्ता महर्षिवाल्मीकिः। ग्रन्थेऽस्मिन् रेखागणितम्, बीजगणितम्, त्रिकोणमिति, भौतिकगणितशास्त्रमित्यादि पञ्चविंशत्यधिकत्रिशत् (३२५) गणितप्रक्रियाः, खणिजशास्त्रम्, जलयन्त्रशास्त्रम्, भूगर्भशास्त्रम्, वायुः, औष्ण्यम्, विद्युतः मापनमित्याद्यनेक–विषयाः प्रतिपादिताः।

2. शब्दशास्त्रम्– शास्त्रगिदम् ऋषिखाण्डिकेन प्रणीतम्। यथा नाम तथा शास्त्रमिदं जगति समस्तपदार्थाणां ध्वनीनां प्रतिध्वनीनां च विषये चर्चितं वर्तते। शास्त्रमिदं पञ्चाध्यायात्मकम्। पञ्चष्वध्यायेषु कृत्रिमध्वनी–नामुत्पत्तिः, तेषां स्थितिः, वेगादीनां मापनं कथमित्यादिविषयाः प्रतिपादिताः।

3. शकुनशास्त्रम्– गर्गमुनिप्रणीतेस्मिन् शास्त्रे पक्षीणां रवैः, मनुष्याणां वाग्भिश्च शुभाशुभनिर्णयविधानं प्रतिपादितम्।

4. शिल्पशास्त्रम्– कश्यपप्रजापतिविरचितमिदम् शास्त्रं द्वाविंसत्यध्यायेषु सप्तोत्तरत्रिशत (३०७) प्रकारशिल्पानां विषये सविस्तरेण व्याख्यातं वर्तते। देवालयनिर्माणविषये राजभवनानां सत्राणां तथा अनेकानां निर्माणविषये [illegible]धिकं वर्णनम् विहितमस्ति। शास्त्रेऽस्मिन्नेव विश्वामित्रः, मयः, मारुतिः, छायापुरुषादिभिरुक्तविषया अपि वर्णिताः।

५. सूपशास्त्रम्– सुकेशप्रणीतेऽस्मिन् पाकशास्त्रे विश्वव्याप्त द्वात्रिंशत्युत्तरत्रिसाहस्रम् (३०३२) खाद्यपदार्थाः, तेषां पाकक्रियाविधानादिकञ्च सुस्पष्टं प्रतिपादितम्। अष्टशतोत्तरप्रकाराणि पिष्टेन घृततैलनवनीतान्युपयुज्य क्रियमानमिष्ठान्नानां विषये प्रतिपादितं वर्तते।

६. सामुद्रिकाशास्त्रम्– शास्त्रमिदं समुद्रेणप्रओक्तत्वात् सामुद्रिकाशास्त्रमिति प्रसिद्धम्। शास्त्रेऽस्मिन् शरीरस्योपरिविराजमानशुभलक्षणानि समुद्रेन ज्ञापितानि। ततः परमपि नरद–मान्दव्य–कार्तिकेय– विस्तारितम्। हस्तरेखाशास्त्रस्य मूलग्रन्थोऽप्ययमेव।

७. धातुशास्त्रम्– अश्वनीकुमारप्रणीतमिदं शास्त्रं सप्ताध्यायात्मकम्। सहजकृत्रिमधातूणां विषये विशदत्वेन विस्तारितम्। मिश्रधातवः धातूनां रूपान्तरोत्पत्तिः कथमित्याद्यनेकविषयाः उल्लेखिताः सन्ति। एवम्भूतान्यनेक–शास्त्राणि दृष्टिगोचराणि भवन्ति यथा– भीमप्रणीतं चित्रकर्मशास्त्रम्, मल्लप्रणीतं मल्लशास्त्रम्, वालखिल्य–प्रनीतं परकायप्रवेशम्, अग्निवर्मप्रणीतम् अश्वशास्त्रम्, कुमारस्वामिप्रणीतं गजशास्त्रम्, वात्स्यायनऋषिप्रणीतं रत्नपरीक्षाशास्त्रम्, वीरबाहुप्रणीतं महेन्द्रजालशास्त्रम्, व्यासप्रणीतमर्थशास्त्रम्, अगस्त्यप्रणीतं शक्तितन्त्रम्, मतङ्गऋषिप्रणीतं सौधामिनी कलाशास्त्रम्, अत्रिमुनिप्रणीतं मेघशास्त्र, भरद्वाजप्रणीतं यन्त्रशास्त्रम्, विश्वामित्रप्रणीतं धनुर्वेदशास्त्रम्, नन्दिकेश्वरप्रणीतं गान्धर्वशास्त्रम् इति। एतानि सर्वाण्यपि शास्त्राणि वेदोक्तविषयानाधारीकृत्यैव संशोध्य संशोध्य च विस्तृतज्ञानराशिं आगामिसमाजस्योद्धारनाय अस्मदृषिभिः प्रदत्तम्।

**संदर्भः**


१. ऋग्वेदः
२. सूर्यसिद्धान्तः
३. आर्यभटीयम्, गोलकपादः
४. पञ्चसिद्धान्तः
५. कृष्णयजुर्वेदः, ३.४.११.१६
६. यजुर्वेदारण्यकम्
७. अथर्वणवेदः
८. ऋग्वेदीयसायणभाष्यम्


⊙



Scanned with CamScanner